**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 6.471
Volume - 6, Issue - 8, August - 2023 Publication Date: 31/08/2023

DOIs:10.2018/SS/202308015 --:-- Research Paper / Article / Review

# केरलीयसंस्कृतनाटकेषु आश्चर्यचूडामणेः वैशिष्ट्यम्।

**Aswathy M.**
Research Scholar, Department of Sanskrit General, SSUS Kalady Kerala, India
Email - : achu7507@gmail.com

**सारांशः-** केरलीयसंस्कृतरूपकेषु सुप्रसिद्धो भवति शक्तिभद्रेण विरचितम् आश्चर्यचूडामणिः। रामायणकथामाश्रित्य कविना शक्तिभद्रेण विरचितम् आश्चर्यचूडामणिः नाम नाटकं सप्तसु अङ्केषु विभक्तम् । आङ्गलेय- मलयालभाषायामपि अस्य नाटकस्य व्याख्यानानि समुपलभ्यते। वीर- अत्भुतरसप्रधानमिदं नाटकं केरलीयसंस्कृतनाटकविभागे विशिष्टस्थानम् अलङ्करोति। आश्चर्यचूडामणिः नाम नाटकस्य शूर्पणखा- अशोकवनिका- अङ्गुलीयाङ्कानि च स्वीकृत्य एव कूटियाट्टस्य अवतरणं कृतम्। अस्मिन् प्रबन्धे शक्तिभद्रस्य परिचयम्, केरलीयसंस्कृतरूपकाणि आश्चर्यचूडामणेः वैशिष्ट्यं च प्रतिपादयन्ति।

**१.आमुखः।**

केरलीय- संस्कृतमहाकवीनां मध्ये समुन्नतस्थानमलङ्करोति श्री शक्तिभद्रः। पूर्वकाले एव केरलदेशे प्रख्यातकीर्तेः तस्य जीवितकालं देशं च अधिकृत्य मतभेदाः भवन्ति। केरले पत्तनंतिट्टा जिल्लायां कोटुमण् पकुति, अङ्ङटिक्कल् ग्रामे चेन्नीर्क्कर स्वरूपं नाम ब्राह्मणकुटुम्बे तस्य जन्मः अभूत्। तस्य जीवितकालः नवमशतकस्य पूर्वार्धे इति सामान्येन पण्डितमतम्। शङ्करस्य समकालीनः, कुलशेखरस्य अर्वाचीनः, कुलशेखरस्य पूर्विकः इति मतत्रयं भवति। तिरुवितांकूर् देशे मण्णटि नाम प्रदेशमेव शक्तिभद्रस्य जन्मदेशमिति वटक्कुम्कूर् राजराजवर्मणा उक्तम्।[१] चेङ्ङन्नूर् ग्रामे चेन्नीर्क्कर स्वरूपं नाम भवने इति उल्लूर् महोदयस्य अभिप्रायः।[२] शक्तिभद्रस्य यथार्थनाम शङ्करः इति, शक्तिभद्रः इत्यनेन स्थाननामो सूच्यते इति कथ्यते।

## २. केरलीयसंस्कृतनाटकेषु आश्चर्यचूडामणेः वैशिष्ट्यम्।

**<u>शङ्कराचार्यः शक्तिभद्रश्च</u>**

श्रीशङ्कराचार्यस्य शक्तिभद्रस्य च संबन्धा एकमैतिह्यं प्रसिद्धम् ।[३] शङ्कराचार्यस्य दिग्विजयकाले चेङ्ङन्नूर् देशे प्राप्ते समये शक्तिभद्रः आचार्यं दृष्ट्वा स्वविरचितम् 'आश्चर्यचूडामणि' नाम नाटकम् अपाठयत्। किन्तु मौनव्रतावलम्बी आचार्यः नाटकमधिकृत्य अभिप्रायः न अवदत्। निराशाभरितः शक्तिभद्रः तस्य कृतिम् अग्नौ निक्षिप्तवान्। कालान्तरे द्विग्विजयानन्तरं प्रत्यागतः शङ्करः शक्तिभद्रमाहूय 'कुत्रास्ति भुवनभूतिः' इत्यपृच्छत्।

आश्चर्यचूडामण्यां द्वितीयाङ्के-

त्रिभुवनरिपुरस्याः पूर्वजो रावणश्चे-
दसुलभ इति नूनं विश्रमः कार्मुकस्य
रजनिचरनिबन्धं प्रायशो वैरमेतद्
भवतु भुवनभूत्यै सर्व रक्षोवर्धन।।[४]

इति पद्यं तस्मिन् प्रयोगे 'भुवनभूतिः' इति पदं च शङ्करस्य अभिनन्दनमर्हति च। तदा नाटकम् अग्नौ दग्धमिति शङ्करम् अवदत्। "पुस्तं गतं बुद्धिरवस्थिता मे" इत्युक्त्वा शङ्कराचार्यः आश्चर्यचूडामणि नाम नाटकम् आद्यन्तं स्मृत्वा उवाच। अनेन ऐतिह्येन शङ्कराचार्यस्य समकालीनः भवति शक्तिभद्रः इति सिद्ध्यति। आश्चर्यचूडामणेः प्रस्तावनायम् "उन्मादवासवदत्तादीनां काव्यानां कर्तुः"[५] इति वाक्येन कविना काव्यान्तराण्यपि विरचितमिति स्पष्टं, किन्तु तानि नोपलभ्यते। उन्मादवासवदत्तमेव वीणावासवदत्तनाम्ना ज्ञायते इति पण्डितमतम्।[६]

## केरलीयसंस्कृतरूपकाणि

केरलीयसंस्कृतरूपकेषु सुप्रसिद्धो भवति शक्तिभद्रेण विरचितम् आश्चर्यचूडामणिः। अस्मिन्नाटकस्य आरम्भे नटी- सूत्रधारयोः संभाषणेन दक्षिणात्याः तद्भिनावद्धि नाटकनिर्माणं न कृतमिति ज्ञातम्। "आकाशं प्रसूते पुष्पं, सिकताः तैलमुत्पादयन्ति, यदि दक्षिणस्याः दिशः आगतं नाटकनिबन्धनम्"[७] इति। अस्य अपवादस्य दूषणार्थमेव कविः एवं प्रकारेण विरचितम्। शक्तिभद्रस्य पूर्वं दक्षिणदेशतः कृतिद्वयमेव ख्यातः बोधायनस्य भगवदज्जुकम्, महेन्द्रवर्मस्य मत्तविलासप्रहसनं च। आश्चर्यचूडामणेः पश्चात् एव कुलशेखरस्य तपतीसंवरणम्, सुभद्राधनञ्जयं च विख्यातौ। रविवर्मकुलशेखरस्य प्रद्युम्नाभ्युदयम्, पूर्णसरस्वतेः कमलिनीराजहंसम्, नीलकण्ठस्य कल्याणसौगन्धिकं व्यायोगम्, कोटुङ्ङल्लूर् नीलकण्ठस्य कमलिनीकलहंसम्, रामपाणिवादस्य सीताराघवं नाटकम्, जातवेदस्य पूर्णपुरुषार्थचन्द्रोदयम्, श्रीरामस्य सुबालावज्रतुण्डम्, काक्कश्शेरी भट्टतिरिवर्यस्य इन्दुमतीराघवम्, कृष्णदासस्य कलावतीकामरूपम्, सुदर्शनस्य कुमारीविलसितम्, रङ्गनाथस्य दमयन्तीकल्याणम्, श्रीधरस्य लक्ष्मीदेवनारायणीयम्, रतिकारस्य शृङ्गारमञ्जरी भाणम् गोदवर्मणः वासवीशान्तनवम्, अज्ञातकर्तृतं चन्द्रिकाजनमेजयम्, भ्रमरकाहली भाणं इत्यादयः एव अन्यानि प्रसिद्धानि केरलीयसंस्कृतरूपकाणि।

रामायणकथामाश्रित्य कविना शक्तिभद्रेण विरचितम् आश्चर्यचूडामणि नाम नाटकं सप्तसु अङ्केषु विभक्तम् । वाल्मीकिरामायणस्य आरण्यकाण्डात् युद्धकाण्डपर्यन्ता कथामितिवृत्तरूपेण कविः स्वीकरोति। किन्तु रामायणकथायां बहुप्रकाराणि परिवर्तनानि अकरोत्। अस्मिन्नाटके वने रामलक्ष्मणौ पर्णशालायां सीतया सह निवासकाले ललितरूपिण्याः शूर्पणखायाः प्रवेशनादारभ्य सीतायाः अग्निपरीक्षापर्यन्तां कथामत्र परामर्शितम् । नाटकेऽस्मिन् अङ्कस्य प्रत्येकमभिधानमपि वर्तते-

पर्णशाला शूर्पणखा मायासीता ततः परं
जटायुषो वधोऽशोकवनिकाप्यङ्गुलीयकं
सप्तमोङ्कस्ततश्चेत्थं चूडामण्यङ्ककीर्तिनम्। इति।[८]

नाटके तृतीयेऽङ्के खरदूषणादिराक्षसानां निग्रहान्तरं सन्तुष्टाः महर्षयः रामाय चूडामण्यङ्गुलीयकौ, लक्ष्मणाय कवचं च दत्तम्। अस्य चूडामणेः विशेषतया एव नाटकस्य नाम आश्चर्यचूडामणि इति कल्पितं कविना ।

मणिमंशु केसरितमङ्गुलीयकं
कलधौतसिद्धमपि धायन्ति ये,
समवाप्य तानवशमाशु मायिनः
प्रकृतिं वृजन्ति सहसा क्षपाचराः ।[९]

एतदेव चूडामणेः अङ्गुलीयस्य प्रभावः । शरेभ्यो मर्मणि रक्षतीति कवचस्य गुणम्। 'वीरकार्यात्भुतरसभूयिष्ठत्वेन आश्चर्यकराणां चूडामणिरित्याश्चर्यचूडामणिरिति संज्ञा। आश्चर्यभूतचूडामणिर्यस्मिन् प्रतिपाद्यत्वेन अङ्गीकृत इति वा' - एवं व्याख्यातारः आश्चर्यचूडामणिपदस्य अर्थः कथ्यते । अस्मिन्नाटकस्य प्रथमाङ्कस्य नामो भवति पर्णशालाङ्कम् । काम्यरूपिण्याः शूर्पणखायाः प्रवेशनं,पर्णशालावर्णनं, माता कैकेय्यां प्रति रामाय क्रुद्धः लक्ष्मणवचनानि रामस्य प्रत्युत्तराणि च अन्तर्भवति। तृतीये शूर्पणखाङ्के भीमस्वरूपिण्याः शूर्पणखायाः वर्णना, शूर्पपणखालक्ष्मणयोः युद्धः च मुख्यविषयाः। मायासीताङ्कं नाम तृतीयोऽङ्कः वृद्धतापस-ऋषिकुमारयोः संभाषणेन (विष्कम्भं) आरभते। अस्मिन्नङ्के तु चूडामण्यङ्कुलीयकवचानां सविशेषतां वदन्ति। सीतारामलक्ष्मणवेषधराणां शूर्पणखा-रावण-सूतानामागमनं, सीतापहरणं, अङ्गुलीयस्य विशेषविज्ञानदृष्टान्तम् इत्येदानि कविना कल्पितम्। जटायुवधाङ्को नाम चतुर्थेऽङ्के पक्षिश्रेष्ठस्य जटायोः वधं, सीतायाः विलापं च वर्णितम्।

अशोकवनिकाङ्को नाम पञ्चमाङ्कः चेटी- मणडोदर्योः सम्भाषणेन आरभते। मण्डोदर्याः स्वप्नवृत्तान्तं, काम्यरूपेण प्रवेशः, सीतारावणयोः भाषणं च हृद्यमेव। षष्ठेः अङ्गुलीयाङ्के- अङ्गुलीयकेन लङ्कां प्रविष्टस्य हनुमतः सीतां प्रति वचनानि, हनुमतः गमनं च वर्णितम्। अन्तिमः सप्तमेऽङ्कः विद्याधरसौमिन्योः भाषणेन ( विष्कम्भं ) आरभते। सीतायाः अग्निपरीक्षा, नारदेनोक्तम् अनसूयायाः वरदानवृत्तान्तं, सीतारामपुनस्समागमं च अत्र चित्रितम्। मन्त्रैरावर्ज्यमानं[१०]........इत्यारभ्य भरतवाक्येन नाटकं समाप्तम्।

वाल्मीकिरामायणे सीतायाः अग्निप्रवेशस्य कारणं रावणसङ्केतनिवासमेव किन्तु शक्तिभद्रेण सन्दर्भोऽयं विकारतीव्रतया चित्रितम्। रावणसविधे विरहं विना पुष्पचन्दनाद्यलङ्कृतायाः सीतायाः दर्शनमेव राममनसि शङ्कां वर्धयति स्म। वस्तुतः अनसूयायाः " तव भर्तुर्दर्शनपथे सर्वं मण्डनं भविष्यति " इति अनुग्रहेणैव अस्याः अवस्थायाः कारणम्। अन्यः सुप्रधानः नाटकीयता चूडामण्यङ्गुलीयकार्ये वर्तते। द्वयोः दर्शनमात्रे सीतारामयोः आश्चर्यं, तयोः अद्भुतप्रभा, फलसिद्धिः इत्याति प्रतिपादने कवेः वर्णनावैभवं कर्मकुशलतां च द्रष्टुं शक्यते । मायासीताङ्के रावणमारीचौ रामस्य, सूतः लक्ष्मणस्य च रूपे आगत्य सीतामपहरति। शूर्पणखा सीतारूपेणागत्य रामं विभ्रामयति च। एवं रामत्रयाणां, सीताद्वयोः,लक्ष्मणद्वयोः चित्रणमपि अत्याश्चर्यजनकोऽभूत्। रावणान्तिके सीतायाः धैर्यं दृष्ट्वा मण्डोदर्याः विस्मयं,हनुमतः लङ्काप्रवेशे सीतायाः विस्मयं, इत्यादि भागे शक्तिभद्रः अत्भुतरसस्य शोभां परिपोषयति।

आश्चर्यचूडामणि नाम नाटकस्य अङ्गरसः कः इति विषयमधिकृत्य मतद्वयमस्ति अत्भुतः वीरः वा इति। वटक्कुम्कूर् राजराजवर्मणः अभिप्रायेण अङ्गिरसः वीरः, अङ्गरसः अत्भुतमिति कथ्यते।[११] रामः रावणं हत्वा सीतां रक्षयति इति नाटकस्य अन्तिमफलम्। अत्र रामस्य आयोधनपाटवेन वीरस्य स्थायीभावमेव प्रकटितम् अतः वीरः मुख्यरसः इति अभिप्रायः। किन्तु नाटके सर्वत्र अत्भुतदृश्यानि अनेकानि भवन्ति, नाटकस्य नामोऽपि तद् प्रदर्शितम् अतः अत्भुतरसप्रधानमयं नाटकमिति कुप्पुस्वामिशास्त्रिणः मतम्। आश्चर्यचूडामण्यां कवेः शक्तिभद्रस्य रचनाचातुरींद्रष्टुं शक्यते। ललितपदप्रयोगेन मितवाक्येन शैल्याः सुव्यक्ततया च विशिष्टमिदं नाटकम्। अस्मिन्नाटके राजधर्मः, राज्यतन्त्रज्ञता, सदुक्तयः, भक्तिः, धर्माधर्मविचारः च परिस्फुरन्ति। उपमा, स्वभावोक्त्यादीनाम् अलङ्काराणां विनिवेशः कविना सन्दर्भानुसारेण कृतम्। अस्य उदाहरणं भवति शूर्पणखारावणयोः वर्णना, आश्रमवर्णनां च। जटायुवधाङ्के रावणजटायुयुद्धे वीररसं, षष्ठेऽङ्के रामस्य विरहवर्णनायां विप्रलम्भशृङ्गारस्य प्रयोगानि च उत्तमं भवन्ति। प्रथम-तृतीय- चतुर्थ-पञ्चम - षष्ठाङ्केष्वपि शृङ्गाररसप्रयोगानि भवन्ति। वीरः,रौद्रः, भयानकादि रसाः च अङ्गाः भवन्ति नाटके अस्मिन्। कालभारिणि, सुन्दरी नाम वृत्तौ अनायासेन प्रयुज्यते।

आश्चर्यचूडामणेः नायकः धर्मनिरतः श्रीरामः, प्रतिनायकः रावणः, नायिका सीता, प्रतिनायिका शूर्पणखा च भवन्ति। कविः नाटकस्य प्रारम्भे तु लक्ष्मणं वीरशूरत्वेन कल्पितम्। हनुमान्,मण्डोदरी, चेटी,मारीचः, सूतः, जटायुः च अन्यः मुख्य कथापात्राणि। इतरान् नाटकानपेक्ष्य आश्चर्यचूडामणि नाम नाटकम् अभिनेतुम् अत्युत्तमं भवतीति बुधैः कथितः। अतः एव कूटियाट्टस्यावतरणार्थम् अस्मिन्नाटकात् शूर्पणखाङ्कम्, अशोकवनिकाङ्कम्, अङ्गुलीयाङ्कम् च स्वीकृतम्। रामायणस्य उपजीव्यकाव्येषु प्रथमस्थाने भवभूतेः उत्तररामचरितम्,द्वितीयस्थाने शक्तिभद्रस्य आश्चर्यचूडामणिरिति उच्यते। नाट्यशास्त्रनियमानुल्लङ्घ्य चतुर्थेऽङ्के जटायुरावणयोः युद्धमवतरति स्म। अस्मिन्नाटकस्य व्याख्यानं भवति 'विवृतिः'[१२]। भारद्वाजग्रामवासि कौमारिलमतानुगः भवति व्याख्याता इति मन्यते।

शक्तिभद्रेण लोकतत्वान् नाटकस्य विविधभागेषु विन्यस्यन्ते । एकः उदाहरणः भवति-

असतां सहजो भावश्छन्नः केनापि हेतुना ।
संस्कार इव बीजानाम फलेन सह जायते ।।[१३]

अस्य नाटकस्य कथासंविधानं, पात्रसंयोजनं, सम्भाषणम् इत्यादीनि हृद्यानि भवन्ति।

शक्तिभद्रस्य कालात्पूर्वं दक्षिणदेशातः केवलं बोधायनस्य भगवदज्जुकीयम् ( भगवदज्जुकम् ) महेन्द्रविक्रमपल्लवस्य मत्तविलासप्रहसनम् आदि द्वौ प्रहसनौ एव आस्ताम्।

चतुर्थाङ्के नाट्यशास्त्रनियमान् उल्लङ्घ्य जटायुरावणयुद्धं वर्णितम्।

कालिदासस्य अभिज्ञानशाकुन्तलस्य विविधसन्दर्भाः शक्तिभद्रं स्वरचनां कर्तुं स्वाधीनं कृतम् इति द्रष्टुं शक्यते। तृतीये अङ्के रावणस्य रथवर्णना शाकुन्तलस्य प्रथमाङ्के दुष्यन्तस्य रथवर्णनाम् अनुस्मरति। यथा –

हिमकर ! हिमगर्भा रश्मयस्तावकीनाः
मयि मदनविधेये येन वह्निं वमन्ति ।
न तव बलमनङ्गस्यापि वा दुःखभाजो
जनकदुहितुरेषा शर्वरीनाथ ! शक्तिः ।।[१४]

**शाकुन्तले यथा –**

तव कुसुमशरत्वं शीतरश्मित्वामिन्दोः
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैः
त्वमपि कुसुमबाणान्वज्रसारीकरोषि ।[१५]

आश्चर्यचूडामणिः नाटकस्य षष्ठमाङ्के 'दयितमुपनयन्तं ........' इति श्लोकेन विप्रलम्भश्रृङ्गारभावं कविना अतिरम्यं वर्णितम् । इदं सन्दर्भं कूटियाट्टे अभिनेता दीर्घसमयमुपयुज्य रंगावतरणं करोति हि अभिनयसाध्यतां परिगण्य ।

अस्मिन् नाटके कविना धर्मिष्टः उत्तमः नायकः इति रूपेण रामम्, शूरत्वेन लक्ष्मणं च कल्पितम्। रावणस्य स्वभावोऽपि उत्तमरीत्या चित्रितम्। पञ्चमे अङ्के अमात्यरावणयोः धर्माधर्मविचारः सरसरीत्या आलेखयति कर्तारः।

नाटकान्ते 'सारमन्त्रहुत.......' इत्यारभ्य भरतवाक्येन एव आश्चर्यचूडामणि नाम नाटकं समाप्तम्।

यत्कृतं नाटकं चूलामणिचूडामणिः सताम् ।
स कस्यैव न मान्योयं शक्तिभद्रो महाकविः ।।[१६]

अस्मिन् श्लोकेन आश्चर्यचूडामणि नाम नाटकं शक्तिभद्रं च प्रति महनीयम् आदरं स्थानमपि आसीत् इति व्यक्तम् ।

अस्य नाटकस्य व्याख्यानसम्पादनं प्रथमतया कुप्पुस्वामि महोदयेन 1926 तमे वर्षे बालमनोरमा मुद्रणशालातः कृतम्। अन्यः भवति शङ्करशास्त्रिणा बालमनोरमा मुद्रणशालातः कृतम् आङ्गलेयविवर्तनम्। मलयालभाषायां अस्य विवर्तनं कोटुङ्ङल्लूर् कुञ्ञिक्कुट्टन् तम्पुरान् महोदयेन 1893 तमे वर्षे, एन्. वि नम्प्यातिरि महोदयेन 1998 तमे वर्षे कृतम्। अस्य पारम्पर्यकेरलनाट्यशास्त्ररंगे अवतरणार्थं क्रमदीपिका सहितं के. पी. नारायणपिषारटी महोदयेन 1967 तमे वर्षे च सम्पादनं कृतम्।

### ३. उपसंहारः

केरलीयरङ्गवेद्यां प्रचुरप्रचारो अभवत् कविना शक्तिभद्रेण विरचितम् आश्चर्यचूडामणि नाम नाटकम्। रामायणस्य इतिवृत्तं स्वीकृत्य विरचितमिदं नाटकं सप्तभिः अङ्कैः विभक्तम् । कविः रामायणकथायां विविधानि परिवर्तनानि अकरोत्। शूर्पणखायाः अधिकप्राधान्यं, अङ्गुलीयचूडामण्योः निबन्धनं,अनसूयायाः वरदानं, मायारामलक्ष्मणयोः मायासीतायाः च रूपकल्पना, मण्डोदर्याः स्वप्नवृत्तान्तम् इत्यादयः शक्तिभद्रेण नाटकीयतायै योजिताः अंशाः भवन्ति। रामस्य नायकत्वेन अत्भुतरससम्पुष्टेन रचिते नाटके कवेः रचनाकौशलं, तत्वचिन्ताम्, कथापात्राणां स्वभावचित्रणमपि अत्यन्तं हृद्यमेव। केरलीयसंस्कृतमहाकवीनां मध्ये अधुनाऽपि शक्तिभद्रः तस्य कृतिः च विशेषतया सुशोभितम्।

### तथ्यसूत्रम्

१.केरलीयसंस्कृतसाहित्यचरित्रं(वो.१). वटक्कुंकूर् राजराजवर्मा. श्रीशङ्कराचार्यसंस्कृतसर्वकलाशाला, कालटि.१९९७. पृ. २८९
२.केरलसाहित्यचरित्रं ( वो.१). रावुसाहिब्, महाकवि उल्लूर् एस् परमेश्वरय्यर् . केरलसर्वकलाशाला प्रसिद्धीकरणम्, तिरुवनन्तपुरम्. १९९५. पृ. १३१
३.केरलीयसंस्कृतसाहित्यचरित्रं(वो.१).वटक्कुंकूर् राजराजवर्मा.श्रीशङ्कराचार्यसंस्कृतसर्वकलाशाला , कालटि.१९९७, पृ. २८९
४. आश्चर्यचूडामणि २.१९
५.आश्चर्यचूडामणि. अङ्कः १. सूत्रधारस्य भाषणम्
६. आश्चर्यचूडामणि. अङ्कः १
७.केरलसाहित्यचरित्रं (वो.१) रावुसाहिब्, महाकवि उल्लूर् एस् परमेश्वरय्यर्.केरलसर्वकलाशाला प्रसिद्धीकरणम्, तिरुवनन्तपुरम्. १९९५.पृ.१३०
८. आश्चर्यचूडामणि. अङ्कः ७
१. आश्चर्यचूडामणि. ३.१०
१०. आश्चर्यचूडामणि ६.३६
११. केरलीयसंस्कृतसाहित्यचरित्रं (वो.१) वटक्कुंकूर् राजराजवर्मा. श्रीशङ्कराचार्यसंस्कृतसर्वकलाशाला , कालटि.१९९७. पृ. २९८
१२.केरलीयसंस्कृतसाहित्यचरित्रं (वो.१) वटक्कुंकूर् राजराजवर्मा. श्रीशङ्कराचार्यसंस्कृतसर्वकलाशाला , कालटि.१९९७. पृ. ३०२
१३. आश्चर्यचूडामणि ३.४
१४. आश्चर्यचूडामणि ४.६
१५. अभिज्ञानशाकुन्तलम् ३.३
१६. नटाङ्कुशम् १.१४

### सहायकग्रन्थाः


- *आश्चर्यचूडामणि – शक्तिभद्रः*. के . पि. नारायणपिषारटि. केरलसंगीतनाटक अक्काडमी.१९८८
- *आश्चर्यचूडामणि – शक्तिभद्रः*. कोटुङ्ङल्लूर् कुञ्ञिक्कुट्टन् तम्पुरान्. साम्स्कारिकप्रसिद्धीकरणवकुप्प् ,तिरुवनन्तपुरम्.२००४
- *आश्चर्यचूडामणि –शक्तिभद्रः* (वो.१). डा. के . पि. ए मेनोन्. नाग् पब्लिषेर्स्, जवहर्नगर्, देल्ही. १९९८
- *केरलसंस्कृतविज्ञानकोशम्*. डा. पूवट्टूर् एन् रामकृष्णप्पिल्ला. करन्ट् बूक्स्, कोट्टयम्.२००४
- *केरलसाहित्यचरित्रम्* ( वो.१). रावुसाहिब्, महाकवि उल्लूर् एस् परमेश्वरय्यर् . केरलसर्वकलाशाला प्रसिद्धीकरणम्, तिरुवनन्तपुरम्. १९९५
- *केरलीयसंस्कृतसाहित्यचरित्रम्* (वो.१). वटक्कुंकूर् राजराजवर्मा. श्रीशङ्कराचार्यसंस्कृतसर्वकलाशाला , कालटि.१९९७
- भरतमुनेः *नाट्यशास्त्रम्*. के . पि. नारायणप्पिषारटि( विव.). केरलसाहित्य अक्काडमि, तृश्शूर्. १९९९
- *संस्कृतसाहित्य का इतिहास*. डा. उमाशङ्कर् शर्मा ऋषि. चौखम्भा भारती अक्काडमि, वाराणसी.१९९९
- *Naṭāṅkuśa : A Critique on Dramaturgy.* K.G Poulose (ed). Govt. Sanskrit College Committee, Tripunithura. 1993